# Rishi Agastyaproktam Shivarchanopadesham 2

# ऋषि अगस्त्यप्रोक्तं शिवार्चनोपदेशम् २

## Document Information

Text title : Rishi Agastyaproktam Shivarchanopadesham 2

File name : shivArchanopadesham2.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 740-748||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ऋषि अगस्त्यप्रोक्तं शिवार्चनोपदेशम् २

(शिवरहस्यान्तर्गते उग्राख्ये)
अगस्त्यः
अतो यं काममुद्दिश्य यः शिवम्पूजयिष्यति ।
स तं काममवाप्नोति ततोऽधिकमपि ध्रुवम् ॥ ७४० ॥

येऽर्चयन्ति महादेवं सावधानेन सन्ततम् ।
ते समृद्धा भवन्त्येव पुत्रदारधनादिभिः ॥ ७४१ ॥

अप्राप्यं नास्ति शैवेन्द्र श्रीमहादेवपूजया ।
श्रीमहादेवमाराध्य को वा न सुखमेधते ॥ ७४२ ॥

नित्यमव्यभिचारिण्या भक्त्या पूज्योमहेश्वरः ।
दुर्लभा तादृशी भक्तिर्यतः सर्वार्थदायिनी ॥ ७४३ ॥

किं कामधेनुभिर्विप्र किं कल्पतरुकोटिभिः ।
यदि भक्तिर्महादेवे सर्वसम्पत्प्रदायिनी ॥ ७४४ ॥

यदि भक्तिर्महादेवे भक्तितरव्यभिचारिणी ।
तदेन्द्रोपेन्द्रचन्द्राद्या गणनीया न सर्वथा ॥ ७४५ ॥

सम्प्राप्य शाम्भवीं भक्ति गणयिष्यति कः सुरान् ।
शिवेतरामराः सर्वे यतः शङ्करकिङ्कराः ॥ ७४६ ॥

देवोत्तमं महादेवमाश्रित्याप्यन्यदैवतम् ।
कः समाराधयेत्प्राज्ञो धनीनिर्धनिनो धनम् ॥ ७४७ ॥

येऽभिवाञ्छन्ति सततमैहिकामुष्मिकं फलम् ।
तेषां सदा शिवादन्यः पूज्यो न भवति ध्रुवम् ॥ ७४८ ॥

॥ इति शिवरहस्यान्तर्गते ऋषि अगस्त्यप्रोक्तं शिवार्चनोपदेशं २ सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २७ मध्यार्जुनमहिमानुवर्णनम् । ७४०-७४८॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. 740-748..

Notes:

Ṛṣi Agastya **ऋषि अगस्त्य**; delivers Upadeśa **उपदेश** as an iteration about worshiping Śiva **शिव**.

Proofread by Ruma Dewan

*Rishi Agastyaproktam Shivarchanopadesham 2*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*